## मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी अग्रिमसप्ताहे थाईलैण्डश्रीलङ्कादेशयोः यात्रायै गमिष्यति अत्रान्तरे बैंकॉकनगरे षष्ठे बिम्सटेक-शिखरसम्मेलने भागं भजिष्यति सहैव कोलम्बो-नगरे शीर्षनेतृत्वेन सह द्विपक्षीयवार्तामपि साधयिष्यति।
- विदेशमन्त्री डॉ. एस जयशंकरः अद्य प्रोक्तवान् यत् भारतदेशः पाकिस्तानदेशे अल्पसंख्यकजनैः सह जायमानः व्यवहारः सावधानतया अवलोकयति सहैव एतं प्रकरणं अन्ताराष्ट्रीयस्तरेऽपि समुत्थापयति।
- षोडश-शताब्द्याः राजपूत-शिरोमणिं राणा-सांगा इत्यमुं विरुध्य समाजवादि- पार्टीतिदलस्य सांसदेन कृतायाः टिप्पणिमालक्ष्य राज्यसभायां कोलाहलः सञ्जातः।
- म्यांमारदेशे अद्य समागत-भूकम्पाभ्यां केषाञ्चिज्जनानां मृत्युः सम्भाव्यते। बैंकॉकनगरेऽपि तीव्रकम्प: अनुभूतिमागत:।
- ऑस्ट्रेलियादेशस्य प्रधानमन्त्री एंथनी-अल्बनीज़ इत्येषः मईमासस्य तृतीयदिनाङ्कात् सामान्य-निर्वाचनं भविष्यति इत्यघोषयत्।
- टेनिस्-क्रीडायां नोवाक् जोकोविच् एटीपी-मास्टर्स्-1000-इत्यस्याः क्रीडायाः उपान्त्यचक्रे प्रविश्य प्राचीनतमः क्रीडकः भूत्वा ऐतिह्यं विरचितवान्।

## प्रधानमन्त्री बिम्स्टेक

प्रधानमन्त्री नरेन्द्रमोदी आगामिमासस्य तृतीयदिनाङ्कात् प्रारभ्य थाइलैण्डश्रीलङ्कादेशयोः यात्रां विधास्यति। स्वयात्रायाः प्रथमे चरणे श्रीमोदी थाइलैण्डदेशेन समायोजिते षष्ठे बिम्स्टेक्-शिखरसम्मेलने भागग्रहणार्थं द्विदिवसीय-यात्रायै बैंकॉकनगरे गमिष्यति। अस्माकं संवाददात्रा विज्ञापितं यत् अस्य शिखरसम्मेलनस्य विषयः अस्ति - "बिम्स्टेक् - समृद्धः, मुक्तश्चास्तीति। श्रीमोदिन: एषा यात्रा थाईलैण्डदेशस्य प्रधानमन्त्रिणः पेटोङ्गटार्न् शिनावात्रा इत्यस्य आमन्त्रणे भवति। एषा तस्य तृतीया थाईलैण्डयात्रा भविष्यति। अस्मिन् सत्रे बिम्स्टेक-नेतृभिः बिम्स्टेक-रूपरेखायां सहकार्यं वर्धयितुं विविध-संस्था तथा क्षमता-निर्माण-उपायानां विषये चर्चा: भवितुमर्हन्ति। अस्याः यात्रायाः अनन्तरं श्रीमोदी आगामि-मासस्य चतुर्थ-दिनाङ्कात् त्रिदिवसीय-राजकीय-यात्रायां श्रीलङ्का-देशं गमिष्यति। श्रीलङ्कादेशस्य राष्ट्रपत्युः अनुराकुमार-दिसानायकेत्यस्य निमन्त्रणे प्रधानमन्त्री राष्ट्रपति-दिसानायकेन सह चर्चां करिष्यति।

## विदेशमन्त्री डॉ. एस जयशंकरः

विदेशमन्त्री डॉ. एस जयशंकरः अद्य प्रोक्तवान् यत् भारतदेशः पाकिस्तानदेशे अल्पसंख्यकजनैः सह जायमानः व्यवहारः सावधानतया अवलोकयति सहैव एतं प्रकरणं अन्ताराष्ट्रीयस्तरेऽपि समुत्थापयति। लोकसभायां कस्यचन प्रश्नस्य उत्तरप्रदानसमये डॉ. जयशंकरः अवदत् यत् संयुक्तराष्ट्र- मानवाधिकारपरिषदि भारतीयप्रतिनिधिना एतस्मिन् विषये सम्यक् प्रकाशितम्। तेनोक्तं यत् पाकिस्तानदेशे मानवाधिकाराणाम् हननम्, अल्पसंख्यकजनानाम् उत्पीडनम्, लोकतान्त्रिकमूल्यानां चापमाननं तत्रत्याः नीतयः सन्ति। अन्यस्य कस्यचन प्रश्नस्य उत्तरं प्रददन् विदेशमन्त्री प्रोक्तवान् यत् नवदिल्ली बाङ्ग्लादेशे अल्पसंख्यकजनानां कल्याणार्थमपि दृष्टिं संस्थापयति।

## राज्यसभा-राणासांगा

समाजवादी-पार्टीति-दलस्य सांसदेन रामजीलाल सुमनेन षोडश-शताब्द्याः राजपूतराजानम् राणासांगा इत्यमुं विरुध्य कथिता: आपत्तिपूर्ण-टिप्पण्य: आलक्ष्य कोलाहलम् अभवत् येन अद्य मध्याह्नपर्यन्तं राज्यसभा स्थगिता जाता। पुनः कार्याचारणस्य आरम्भानन्तरं सदस्याः विषयं उत्थाप्य समाजवादीपक्षस्य नेतारं स्वटिप्पण्याः कृते क्षमायाचनां कर्तुं आग्रहं कृतवन्तः। राज्यसभाध्यक्षः जगदीपधनखड: उक्तवान् यत् राष्ट्रनायकानां अपमानं न कर्तव्यं, सदस्याः एतादृशाणां महापुरुषाणां विषये टिप्पणीं कुर्वन्तः अतीव संवेदनशीलाः भवेयुः। संसदीयकार्याणां मन्त्री किरेन् रिजिजुः सदस्येभ्यः आग्रहं कृतवान् यत् ते अध्यक्षस्य निर्देशानामादरं कुर्वन्तु। केन्द्रीयमन्त्री पीयूषगोयलः अपि समाजवादीपक्षस्य नेतुः वचनं निन्दनीयम् इति उक्तवान्। विपक्षस्य नेता मल्लिकार्जुन खर्गे अपि देशस्य कृते प्राणाहुतिं कृतवतां सर्वेषां सम्मानं करणीयम् इति उक्तवान्। सः तु अवदत् यत्, सन्सद-भवने आक्रमणं कृत्वा विधेः उल्लंघनं नोचितम्। कोलाहलस्य मध्ये उपाध्यक्षः सदनं मध्याह्न-द्वादशवादन-पर्यन्तं स्थगितवान्। राणासांगा इत्यस्य विषये कथिता: आक्षेपार्ह-टिप्पण्य: अपि लोकसभायां उत्थापिता:। कोलाहलपूर्णदृश्यानां मध्ये लोकसभा अपराह्ण-द्विवादनपर्यन्तं स्थगितम्।

**म्यान्मार-भूकम्पः**

म्यांमारदेशे अद्य सप्त-दशमलव-सप्त तथैव षड्-दशमलव-चत्वारि रिक्टेयरमानेन समागताभ्यां भूकम्पाभ्यां केषाञ्चिज्जनानां मृत्युः सम्भाव्यते। सागाइंगक्षेत्रस्य समीपे केन्द्रितेन भीषणभूकम्पेन मांडलेनगरस्य प्रतिष्ठितः अवा इति सेतुबन्धः पतितः सहैव इरावदीनद्याःसमीपे स्थितानि बहूनि भवनानि च विनष्टानि। थाईलैंडदेशस्य राजधान्याः बैंकॉकनगरात् प्रायः नवशतकिलोमीटरमितं यावत्दूरेऽपि सशक्तं भूकम्पनम् अनुभूतम्, येन जनाः स्वगृहाणि परित्यज्य बहिरागन्तुं बाधिताः अभवन् । थाईलैंडदेशस्य प्रधानमन्त्रिणा पैटोंगटार्न शिनवात्रा इत्यमुना आपत्कालस्थितिः समुद्घोषिता । थाईलैण्डदेशस्य आपन्निवारणविभागेन प्रोक्तं यत् भूकम्पः देशस्य प्रायः सर्वेषु प्रदेशेषु अनुभूतः। पश्चिमबंगालमणिपुरप्रदेशयोः अपि भूकम्पस्य प्रभावः अनुभूतिमागतः।

**ऑस्ट्रेलिया-निर्वाचनम्**

ऑस्ट्रेलियादेशस्य प्रधानमन्त्री एंथनी-अल्बनीज़ इत्येषः देशे वर्षेऽस्मिन् मईमासस्य तृतीयदिनाङ्कात् सामान्य-निर्वाचनं भविष्यति इत्यघोषयत् । श्री अल्बनीज़ इत्यनेन सन्सदभवनस्य वार्ताहरसम्मेलने एतदुद्घोषितम्। निर्वाचने मुख्यसङ्घर्षः प्रधानमन्त्री अल्बनीज़ इत्यस्य लेबर-दलस्य, अथ च मुख्यप्रतिपक्षनेतुः पीटर-डटन इत्यस्य रूढ़िवादि-गठबन्धनस्य च मध्ये भविष्यति।

**मियामी ओपन**

टेनिस्-क्रीडायां नोवाक् जोकोविच् एटीपी-मास्टर्स्-1000-इत्यस्याः क्रीडायाः उपान्त्यचक्रे प्रविष्टः प्राचीनतमः क्रीडकः भूत्वा मियामी-ओपन-क्रीडायां ऐतिह्यम् विरचितवान्। तेन रोजर् फेडर इत्यमुम् अतिक्रम्य इदं किर्तिमतं विरचितम्। रोजरफेडर इत्यनेन ऊनविंशत्यधिक-द्विसहस्रतमे वर्षे सप्तमासाधिक-सप्तत्रिंशत्वयसि इण्डियन वेल्स् तथा मियामी ओपन क्रीडायाः अन्तिमचतुष्टये प्राप्तमासीत् । सप्तमं मियामी ओपन उपाधिं अन्विष्यमाणः जोकोविचः अधुना अद्य रात्रौ भारतीय-मानक-समयानुसारी सार्धद्वादश-वादने बल्गेरियादेशस्य ग्रिगोर् दिमित्रोव इत्यमुं सम्मुखीकरिष्यति।

**॥ इति वार्ताः॥**